# आदर्शप्रश्नपत्रम् (2025-26)

**कक्षा - नवमी** **कोड न. - 049**

रोल नं० | | | | | |

# संस्कृतम्

समयः - 3 होराः ] [ पूर्णाङ्काः : 80

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ 9 तथा प्रश्न 15 हैं।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गये कोड नम्बर तथा सेट को छात्र उत्तर पुस्तिका के मुख्य पृष्ठ पर लिखें।
- कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमाङ्क अवश्य लिखें।
- उत्तर-पुस्तिका के बीच में खाली पन्ना / पन्नें न छोड़ें।
- उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।
- परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।
- कृपया प्रश्नों के उत्तर देनें से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।**

- **सामान्यनिर्देशाः :–**

  (i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
  (ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
  (iii) श्रेष्ठाङ्कान् प्राप्तये सुस्पष्टः लेखः लेखनीयः।

- **अस्मिन् प्रश्नपत्रे पञ्च खण्डाः सन्ति :–**

| | | |
|---|---|---|
| खण्डः 'क' | अपठित-अवबोधनम् | - 10 अङ्काः |
| खण्डः 'ख' | रचनात्मक-कार्यम् | - 10 अङ्काः |
| खण्डः 'ग' | पठित-अवबोधनम् | - 24 अङ्काः |
| खण्डः 'घ' | अनुप्रयुक्त-व्याकरणम् | - 19 अङ्काः |
| खण्डः 'ङ' | पाठाधारिताः बहुविकल्पीयाः प्रश्नाः | - 17 अङ्काः |

## खण्डः 'क'

## अपठित-अवबोधनम्

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि यथानिर्देशं संस्कृतेन लिखत – 10

श्रवण कुमार: पितृभक्त: आसीत् । तस्य मातापितरौ नेत्रहीनौ आस्ताम् । स: सदा तयो: सेवां करोति स्म । एकदा श्रवणस्य पितरौ अवदताम् - वत्स ! आवां तीर्थयात्रां कर्तुम् इच्छाव: । श्रवणकुमार: आज्ञाकारी पुत्र: आसीत्। स: पित्रो: आज्ञाम् अपालयत् ।

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 2×1=2

(क) कः पितृभक्त: आसीत् ?
(ख) कौ तीर्थयात्राम् कर्तुम् इच्छत: स्म ?
(ग) कस्य मातापितरौ नेत्रहीनौ आस्ताम् ?

(ब) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2×2=4

(क) श्रवणकुमारस्य मातापितरौ कीदृशौ आस्ताम ?
(ख) श्रवण: कयो: आज्ञाम् अपालयत् ?
(ग) कः तयो: सेवां करोति स्म ?

(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत । 1

(द) यथानिर्देशम् उत्तरत - ( केवलं प्रश्नत्रयम् ) 3×1=3

(क) 'कर्तुम्' अत्र कः प्रत्यय: ?
(i) तुमुन् (ii) तुम्
(iii) णमुल् (iv) क्त

(ख) 'आसीत्' पदे कः लकारः ?
(i) लङ्लकारः (ii) लोट्लकारः
(iii) लट्लकारः (iv) विधिलिङ्गलकारः

(ग) 'श्रवण: पितृभक्त:' अत्र विशेषणपदं किम् अस्ति ?
(i) श्रवण: (ii) पितृभक्त:
(iii) भक्त: (iv) वण:

(घ) 'तस्य' अस्मिन् पदे का विभक्तिः अस्ति?
(i) चतुर्थी (ii) षष्ठी
(iii) तृतीया (iv) प्रथमा

## खण्डः 'ख'

## रचनात्मक-कार्यम्

2. (क) रुग्णताया: हेतो: दिनत्रयस्य अवकाशार्थम् अरुण: प्रधानाचार्यं प्रति पत्रं लिखति। लिखिते प्रार्थना-पत्रे उचितपदै: रिक्तस्थानानि पूरयत - 5×1=5

परीक्षाभवनम्
तिथि: -

प्रधानाचार्य: महोदय:,
राजकीय-उच्च-माध्यमिक-विद्यालय:,
हिसार-नगरम् ।

(1) ................. ,

सविनयं (2) ................. अस्ति यत् अहं गतसायंकालत: (3 ) ................ अस्मि । ज्वरतापेन अहम् अतीव कृश: (4) .....................। अतः भवान् दिनत्रयस्य (5) ................ स्वीकृत्य माम् अनुगृह्णातु।

भवदीय: शिष्य:
अरुण:

**मञ्जूषा**

| |
|---|
| अवकाशम् , निवेदनम् , माननीया: , अस्मि , ज्वरपीडित: |

2. (ख) निर्दिष्टचित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दैः उचितरिक्तस्थानानि पूरयित्वा लिखत - 5×1=5



1. अत्र एकः बालकः .......... सह आगतः।
2. अस्मिन् चित्रे एकः .......... अस्ति।
3. राजमार्गे ............ कारयानम् अपि गच्छति।
4. कारयानं ............ क्षिपति।
5. माता ............. स्निह्यति।

**मञ्जूषा**

| |
|---|
| एकं , पुत्रे , धूम्रं , मात्रा, वृक्षः |

# खण्डः ‘ग’

## पठित-अवबोधनम्

3. निम्नलिखितं गद्यांशं पठित्वा हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

सूर्योदयात् पूर्वमेव सा तत्रोपस्थिता। वृक्षस्योपरि विलोक्य सा आश्चर्यचकिता सञ्जाता यत्तत्र स्वर्णमयः प्रासादो वर्तते। यदा काकः शयित्वा प्रबुद्धः तदा तेन स्वर्णगवाक्षात् कथितं हंहो बाले! तिष्ठ, अहं त्वत्कृते सोपानमवतारयामि, तत्कथय स्वर्णमयं रजतमयमुत ताम्रमयं वा? कन्या प्रावोचत्, "अहं निर्धनमातुर्दुहिता अस्मि। ताम्रसोपानेनैव आगमिष्यामि।" परं स्वर्णसोपानेन सा स्वर्ण-भवनम् आससाद।

**अथवा**

तस्य च गृहे लौहघटिता पूर्वपुरुषोपार्जिता तुलासीत्। तां च कस्यचित् श्रेष्ठिनो गृहे निक्षेपभूतां कृत्वा देशान्तरं प्रस्थितः। ततः सुचिरं कालं देशान्तरं यथेच्छया भ्रान्त्वा पुनः स्वपुरम् आगत्य तं श्रेष्ठिनमुवाच- "भोः श्रेष्ठिन्! दीयतां मे सा निक्षेपतुला।" स आह- "भोः! नास्ति सा, त्वदीया तुला मूषकैर्भक्षिता" इति।

4. अधोलिखितश्लोकस्य हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

(क) वृत्तं यत्नेन संरक्षेत् वित्तमेति च याति च ।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः ।।

**अथवा**

(ख) वृद्धोऽहं त्वं युवा धन्वी सरथः कवची शरी ।
न चाप्यादाय कुशली वैदेही मे गमिष्यसि ।।

5. अधोलिखितासु सूक्तिषु मात्रद्वयोः सूक्त्योः भावार्थं हिन्दीभाषया लिखत - 2×2=4

(क) ज्ञात्वाऽपि जीविकाहेतोः रचयामि घटानहम् ।

(ख) प्रकृतिरक्षयैव सम्भवति लोकरक्षेति न संशयः ।

(ग) आस्वाद्यतोयाः प्रवहन्ति नद्यः, समुद्रमासाद्य भवन्त्यपेयाः ।

**अथवा**

अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः उचितपदानि चित्वा पूरयत - 4×1=4

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्मात् तदेव वक्तव्यं वचने का दरिद्रता।

**अन्वयः :-**

सर्वे (1) ........................ प्रियवाक्यप्रदानेन (2) .......................... । तस्मात् तद् एव (3) ........................ वचने का (4) .....................................।

**मञ्जूषा**

| तुष्यन्ति, वक्तव्यं, जन्तवः, दरिद्रता |
|---|

6. अधः प्रदत्तं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन पूर्णवाक्येन लिखत - (केवलं प्रश्नत्रयम्) 3×1=3

प्रकृतिः समेषां प्राणिनां संरक्षणाय यतते। इयं सर्वान् पुष्णाति विविधैः प्रकारैः तर्पयति च सुखसाधनैः। पृथ्वी जलं तेजो वायुः आकाशश्च अस्याः प्रमुखानि तत्त्वानि। तानि एव मिलित्वा अस्माकं पर्यावरणं रचयन्ति।

**प्रश्नाः :-**

(1) प्रकृतिः केषां संरक्षणाय यतते ?
(2) प्रकृतिः सर्वान् कैः तर्पयति ?
(3) प्रमुखानि तत्त्वानि मिलित्वा अस्माकं किं रचयन्ति ?
(4) का सर्वान् तर्पयति ?

7. निम्नलिखितश्लोकं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन पूर्णवाक्येन लिखत – (केवलं प्रश्नद्वयम्) 2×1=2

श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम्।
आत्मन: प्रतिकूलानि परेषां न समाचरेत् ।।

**प्रश्नाः :-**

(क) किम् श्रूयताम्?

(ख) कस्य प्रतिकूलानि न समाचरेत्?

(ग) धर्मसर्वस्वं श्रुत्वा किम् कर्तव्यम्?

8. स्थूलपदानि आधृत्य कोष्ठकात् चित्वा प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नत्रयम्) 3×1=3

| | |
|---|---|
| (क) **वृक्षाः** फलं न खादन्ति । | (के/ का:) |
| (ख) तपोदत्त: **विद्याध्ययनाय** गुरुकुलम् अगच्छत् । | (किमर्थं / कस्य) |
| (ग) अजातशिशु: **मातृगर्भे** सुरक्षित: तिष्ठति । | (कुत्र / कदा) |
| (घ) मल्लिका **सखीभिः** सह धर्मयात्रायै गच्छति स्म। | (कया / काभिः) |
| (ङ) **भवता** घृतोत्पत्तिरहस्यं व्याख्यातम्। | (केन / कस्य) |

9. प्रश्नपत्रे लिखितश्लोकान् विहाय '**शेमुषी भाग-1**' पुस्तकाद् एकं श्लोकं संस्कृतभाषया लिखत। 1x4=4

## खण्डः – 'घ'

## अनुप्रयुक्त-व्याकरणम्

10. (क) गुणसन्धे: अथवा अयादिसन्धेः परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

(ख) तत्पुरुषसमासस्य अथवा द्विगुसमासस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

(ग) सम्प्रदानकारकस्य अथवा अधिकरणकारकस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

11. यथानिर्दिष्टं शब्दरूपाणि लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

क. 'राम' शब्दस्य चतुर्थी-एकवचने।

ख. 'बालक' शब्दस्य द्वितीया-बहुवचने।

ग. 'लता' शब्दस्य तृतीया-बहुवचने।

घ. 'किम्' (पु.) शब्दस्य प्रथमा-बहुवचने।

ङ. 'अस्मद्' शब्दस्य पञ्चमी-एकवचने।

च. 'कवि' शब्दस्य षष्ठी-बहुवचने।

12. यथानिर्दिष्टं धातुरूपाणि लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

क. 'पठ्' धातोः लट्लकारस्य मध्यमपुरुष-एकवचने।

ख. 'लिख्' धातोः लोट्लकारस्य प्रथमपुरुष-एकवचने।

ग. 'गम्' धातोः लङ्लकारस्य प्रथमपुरुष-बहुवचने।

घ. 'भू' धातोः लोट्लकारस्य मध्यमपुरुष-द्विवचने।

ङ. 'पा' ( पिब् ) धातोः लट्लकारस्य प्रथमपुरुष-एकवचने।

च. 'सेव्' धातोः लट्लकारस्य प्रथमपुरुष-द्विवचने।

13. प्रदत्तोपपदविभक्तिवाक्येषु उचितविभक्तिं कोष्ठकात् चित्वा लिखत। (केवलं प्रश्नत्रयम्) 3×1=3

क. सीता ................ प्रति गच्छति। (विद्यालयं , विद्यालये)

ख. रामः .............. काणः अस्ति। (नेत्राभ्याम् , नेत्रेण)

ग. .................. दुग्धं रोचते। (बालकं , बालकाय)

घ. .............. अभितः वृक्षाः सन्ति। (ग्रामात् , ग्रामं)

ङ. अलम् ....................। कोलाहलम् , कोलाहलेन)

14. निम्नक्रियापदेभ्यः उपसर्गान् पृथक् कृत्वा लिखत। (केवलं प्रश्नद्वयम्) 2×1=2

क. आगच्छन्ति ख. प्रत्यवदत् ग. विगर्हयेत्

# खण्डः – 'ङ'

# पाठाधारिताः बहुविकल्पीयाः प्रश्नाः

15. अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्तवैकल्पिकचतुर्भ्यः उत्तरेभ्यः एकं शुद्धम् उत्तरं चित्वा लिखत - 17×1=17

(क) 'सूर्य + उदयः' इत्यत्र किं सन्धिपदम् ?

(i) सूर्युदयः (ii) सूर्योदयः

(iii) सूर्यादय (iv) सुर्योदय

(ख) 'स्वागतम्' इत्यत्र कः सन्धिविच्छेदः ?

(i) स्व+आगतम् (ii) सवा+गतम्

(iii) सु+आगतम् (iv) स्व+गतं

(ग) 'मातापितरौ' इत्यस्मिन् पदे कः समासः ?

(i) द्विगुः (ii) अव्ययीभावः

(iii) कर्मधारयः (iv) द्वन्द्वः

(घ) 'धर्माधिकारी' इत्यस्य पदस्य विग्रहपदं किम् ?

(i) धरम अधिकारी (ii) धरमा अधिकारि

(iii) धर्मस्य अधिकारी (iv) धर्मम् अधिकारी

(ङ) 'सुप्तः' इत्यस्य पदस्य विलोमपदं किम् ?

(i) प्रबुद्धः (ii) पूर्वम्

(iii) अनार्यः (iv) अर्या

(च) 'आत्मनः' इत्यस्य पदस्य विलोमपदम् किम् ?

(i) निजम् (ii) परस्य

(iii) स्वयं (iv) विहस्य

(छ) 'पवन:' इत्यस्य शब्दस्य पर्यायपदं किम् ?

(i) रसाल: (ii) समीर:

(iii) तरुः (iv) पृथ्वीम्

(ज) 'सरस्वती' इत्यस्य पदस्य पर्यायपदं किम् ?

(i) वाणी (ii) फलम्

(iii) नारिकेलम् (iv) पवित्र:

(झ) 'श्रु + तुमुन्' इत्यस्य संयोगे किं रूपम् ?

(i) श्रोतुम् (ii) श्रयितुम्

(iii) श्रवितुम् (iv) श्रुतुम्

(ञ) 'ज्ञात्वा' इत्यस्मिन् पदे कः प्रत्ययः ?

(i) क्त्वा (ii) शतृ

(iii) शानच् (iv) तुमुन्

(ट) 'एकोनसप्तति:' इत्यस्मिन् पदे का संख्या ?

(i) 95 (ii) 59

(iii) 49 (iv) 69

(ठ) '28' अङ्कस्थाने किं संख्यावाचीपदम् ?

(i) अष्टाविंशति: (ii)अष्टादश

(iii) अष्ट (iv) अष्टत्रिंशत्

(ड) हितैषिभिः मन्त्रिभिः' अत्र किं विशेष्यपदम् ?

(i) मात्रिभिः (ii) मैन्त्रिभि

(iii) मन्त्रिभिः (iv) हितैषिभिः

(ढ) सरस: रसाल:' अत्र किं विशेषणपदम् ?

(i) सरस: (ii) रसाल:

(iii) सरसरसाल: (iv) आश्वरः


(ण) 'वृक्षस्य' इत्यस्मिन् पदे का विभक्तिः ?

(i) षष्ठी (ii) पञ्चमी

(iii) तृतीया (iv) द्वितीया

(त) घटिकां दृष्ट्वा समयेन रिक्तस्थानं संस्कृतपदेन पूरयत -


बालकः प्रातः ............. वादने उत्तिष्ठति।




(i) द्वादश (ii) त्रयः

(iii) सप्त (iv) पञ्च

(थ) अहं प्रातः ................ भ्रमणाय गच्छामि।




(i) चतुर्वादने (ii) त्रयवादने

(iii) षड्वादने (iv) दशवादने